भामहालङ्कारः ।

श्रीगणेशाय नमः ।

प्रणम्य सार्वं सर्वज्ञं मनोवाक्कायकर्मभिः ।
काव्यालङ्कार इत्येष यथाबुद्धि विधास्यते ॥ १ ॥
धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।
प्रीतिं करोति कीर्त्तिं च साधुकाव्यनिबन्धनम् ॥ २ ॥
अधनस्येव दातृत्वं क्लीबस्येवास्त्रकौशलम् ।
अज्ञस्येव प्रगल्भत्वमकवेः शास्त्रवेदनम् ॥ ३ ॥
विनयेन विना का श्रीः का निशा शशिना विना ।
रहिता सत्कवित्वेन कीदृशी वाग्विदग्धता ॥ ४ ॥
गुरूपदेशादध्येतुं शास्त्रं जडधियोऽप्यलम् ।
काव्यं तु जायते जातु कस्यचित् प्रतिभावतः ॥ ५ ॥
उपेयुषामपि दिवं सन्निबन्धविधायिनाम् ।
आस्त एव निरातङ्कं कान्तं काव्यमयं वपुः ॥ ६ ॥
रुणद्धि रोदसी चास्य यावत् कीर्त्तिरनश्वरी ॥
तावत् किलाऽयमध्यास्ते सुकृती वैबुधं पदम् ॥ ७ ॥
अतोऽभिवाञ्छता कीर्त्तिं स्थेयसीमाभुवः स्थितेः ।
यत्नो विदितवेद्येन विधेयः काव्यलक्षणः ॥ ८ ॥

शब्दश्छन्दोऽभिधानार्था इतिहासाश्रयाः कथाः ।
लोको युक्तिः कलाश्चेति मन्तव्याः काव्ययैर्वशी ॥
(काव्ययैरमी?) ॥९॥
शब्दाऽभिधेये विज्ञाय कृत्वा तद्विदुपासनाम् ।
विलोक्याऽन्यनिबन्धांश्च कार्यः काव्यक्रियादरः ॥१०॥
सर्वथा पदमप्येकं न निगाद्यमवद्यवत् ।
विलक्ष्मणा हि काव्येन दुस्सुतेनेव निन्द्यते ॥११॥
अकवित्वमधर्माय व्याधये दण्डनाय वा ।
कुकवित्वं पुनः साक्षान्मृतिमाहुर्मनीषिणः ॥१२॥
रूपकादिरलङ्कारस्तस्यान्यैर्बहुधोदितः ।
न कान्तमपि निर्भूषं विभाति वनितामुखम् ॥१३॥
रूपकादिमलङ्कारं बाह्यमाचक्षते परे ।
सुपां तिङां च व्युत्पत्तिं वाचां वाञ्छन्त्यलङ्कृतिम् १४
तदेतदाहुः सौशब्द्यं नाऽर्थव्युत्पत्तिरीदृशी ।
शब्दाभिधेयालङ्कारभेदादिष्टं द्वयं तु नः ॥ १५ ॥
शब्दार्थौ सहितौ काव्यं गद्यं पद्यञ्च तद्द्विधा ।
संस्कृतं प्राकृतं चान्यदपभ्रंश इति त्रिधा ॥१६॥
वृत्तदेवादिचरितशंसि चोत्पाद्यवस्तु च ।
कलाशास्त्राश्रयञ्चेति चतुर्धा भिद्यते पुनः ॥१७॥

१ काव्ययैर्ह्यमी–ग । २ कयुतं ? (संस्कृत?)–ग ।

सर्गबन्धोऽभिनेयार्थं तथैवाख्यायिकाकथे ।
अनिबद्धञ्च काव्यादि तत्पुनः पञ्चधोच्यते ॥१८॥
सर्गबन्धो महाकाव्यं महताञ्च महच्च यत् ।
अग्राम्यशब्दमर्थ्यञ्च सालङ्कारं सदाश्रयम् ॥ १९ ॥
मन्त्र[1]दूतप्रयाणाजिनायकाभ्युदयैश्च यत् ।
पञ्चभिः सन्धिभिर्युक्तं नातिव्याख्येयमृद्धिमत् ॥ २० ॥
चतुर्वर्गाभिधानेऽपि भूयसार्थोपदेशकृत् ।
युक्तं लोकस्वभावेन रसैश्च सकलैः पृथक् ॥ २१ ॥
नायकं प्रागुपन्यस्य वंशवीर्यश्रुतादिभिः ।
न तस्यैव वधं ब्रूयादन्योत्कर्षाभिधित्सया ॥ २२ ॥
यदि काव्यशरीरस्य न स व्यापितयेष्यते ।
न चाभ्युदयभाक्तस्य मुधादौ ग्रहणस्तवौ[2] ॥ २३ ॥
[3]नाटकं द्विपदीशम्यारासकस्कन्धकादि यत् ।
उक्तं तदभिनेयार्थमुक्तोऽन्यैस्तस्य विस्तरः ॥ २४ ॥
प्रकृता[4]नाकुलश्रव्यशब्दार्थपदवृत्तिना ।
गद्येन युक्तोदात्तार्था सोच्छ्वासाख्यायिका मता ॥२५॥
वृत्तमाख्यायते तस्यां नायकेन स्वचेष्टितम्[5] ।
वक्त्रं चापरवक्त्रञ्च काले भाव्यार्थशंसि च ॥ २६ ॥

---

१ मन्त्रि–क । २ ग्रहणं स्तवे–ग । ३ नारकं–घ ।
४ प्रसृता–ख, प्रकृता (सृता)–घ । ५ स्वचेष्टितम्–घ ।

कवेरभिप्रायकृतैः कथा[1]नैः कैश्चिदङ्किता ।
कन्याहरणसङ्ग्रामविप्रलम्भोदयान्विता ॥ २७ ॥
न वक्त्रापरवक्त्राभ्यां युक्ता नोच्छ्वासवत्यपि ।
संस्कृतं संस्कृता चेष्टा कथापभ्रंशभाक्तथा[2] ॥ २८ ॥
अन्यैः स्वचरितं तस्यां नायकेन तु नोच्यते ।
स्वगुणाविष्कृतिं कुर्यादभिजातः कथं जनः ॥ २९ ॥
अनिबद्धं पुनर्गाथाश्लोकमात्रादि तत पुनः ।
युक्तं वक्रस्वभावोक्त्या सर्वमेवैतदिष्यते ॥ ३० ॥
वैदर्भ[3]मन्यदस्तीति मन्यन्ते सुधियोऽपरे ।
तदेव च किल ज्यायः सदर्थमपि नापरम् ॥ ३१ ॥
गौडीयमिदमेतत्तु वैदर्भमिति किं पृथक् ।
गतानुगतिकन्यायान्नानाख्येयममेधसाम् ॥ ३२ ॥
ननु चाश्मक[4]वंशादि वैदर्भमिति कथ्यते ।
कामं तथास्तु प्रायेण संज्ञेच्छातो विधीयते ॥ ३३ ॥
अपुष्टार्थमवक्रोक्ति प्रसन्नमृजु कोमलम् ।
भिन्नं गेयमिवेदं तु केवलं श्रुतिपेशलम् ॥ ३४ ॥
अलङ्कारवदग्राम्यमर्थ्यं न्याय्यमनाकुलम् ।
गौडीयमपि साधीयो वैदर्भमिति नान्यथा ॥ ३५ ॥

---

१ कथा (था?) नैः—ग । २ तदा—क ।
३ वैदर्भ—ग । ४ चाश्मक—ग ।

न नितान्तादिमात्रेण जायते चारुता गिराम् ।
वक्राऽभिधेयशब्दोक्तिरिष्टा वाचामलङ्कृतिः ॥ ३६ ॥
नेयार्थं क्लिष्टमन्यार्थमवाचकमयुक्तिमत् ।
गूढशब्दाभिधानञ्च कवयो न प्रयुञ्जते ॥ ३७ ॥
नेयार्थं नीयते युक्तो यस्यार्थः कृतिभिर्बलात् ।
शब्दन्यायानुपारूढः कथञ्चित् स्वाभिसन्धिना ॥ ३८ ॥
मायेव भद्रेति यथा सा चाऽसाध्वी प्रकल्पना ।
वेणुदाकेरिति च तान्नियन्ति वचनाद्विना ॥ ३९ ॥
क्लिष्टं व्यवहितं विद्यादन्यार्थविगमे यथा[1] ।
विजह्रुस्तस्य ताः शोकं क्रीडायां विकृतञ्च तत् ॥४०॥
हिमापहामित्रधरैर्व्याप्तं व्योमेत्यवाचकम् ।
साक्षादरूढं वाच्येऽर्थे नाभिधानं प्रतीयते ॥ ४१ ॥
अयुक्तिमद्यथा दूता जलभृन्मारुतेन्दवः[2] ।
तथा भ्रमरहारीतचक्रवाकशुकादयः ॥ ४२ ॥
अवाचो व्यक्तवाचश्च दूरदेशविचारिणः ।
कथं दूत्यं प्रपद्येरन्निति युक्त्या न युज्यते ॥४३॥
यदि चोत्कण्ठया यत्तदुन्मत्त इव भाषते ।
तथा भवतु भूम्नेदं सुमेधोभिः प्रयुज्यते ॥ ४४ ॥

१ (दन्यार्थं विगमे यथा ?)–ग ।
२ जलभृन्मात्रकेङ्च ? (मारुतेन्दवः?) ग, जलभृन्मात्र (रु ?) पु च–क ।

गूढशब्दाभिधानञ्च न प्रयोज्यं कथञ्चन ।
सुधियामपि नैवेदमुपकाराय कल्पते ॥ ४५ ॥
असितर्त्तितुगाद्रीच्छित स्वःक्षितां पतिराद्दिदृक्[1] ।
अमिद्भिः शुभ्रहग्दृष्टैर्द्विषो जेघ्नीयिषीष्ट वः ॥ ४६ ॥
श्रुतिदुष्टार्थदुष्टे च कल्पनादुष्टमित्यपि ।
श्रुतिकष्टं तथैवाहुर्वाचां दोषं चतुर्विधम् ॥ ४७ ॥
विड्वर्चोविष्ठितक्लिन्नोच्छिन्न[2]वान्तप्रवृत्तयः ।
प्रचारधर्षितोद्गारविसर्गहृदयन्त्रिताः[3] ॥ ४८ ॥
हिरण्यरेताः सम्बाधः पेलवोपास्थिताण्डजाः ।
वाकाटवादयश्चेति श्रुतिदुष्टा मता गिरः ॥ ४९ ॥
अर्थदुष्टं पुनर्ज्ञेयं यत्रोक्ते जायते मतिः ।
असभ्यवस्तुविषया शब्दैस्तद्वाचिभिर्यथा ॥५०॥
हन्तुमेव प्रवृत्तस्य स्तब्धस्य[4] विवरैषिणः ।
पतनं जायतेऽवश्यं कृच्छ्रेण पुनरुन्नतिः ॥ ५१ ॥
पदद्वयस्य सन्धाने यदनिष्टं प्रकल्पते[5] ।
तदाहुः कल्पनादुष्टं सशौर्याभरणो यथा ॥ ५२ ॥

---

१ असिवर्तिभुगाद्रीक्षित स्वः क्षितां पतिराद्दिदृक् ।
अमीभिः शुभ्रहग्दृष्टैर्द्विषो जेघ्नीयिषीष्ट वः ॥—घ ।

२ ०च्छिन्नक्लिन्न०—क । ३ हृदयं वृताः ? (यन्त्रिताः ?)—ग ।

४ स्वस्मस्य (स्तब्धस्य ?)—ग ।

५ प्रगल्भते—क, प्रकल्प्यते—घ ।

यथाऽजिह्लददित्यादि श्रुतिकष्टञ्च तद्विदुः ।
न तदिच्छन्ति कृतिनो गण्डमप्यपरे किल ॥ ५३ ॥
सन्निवेशविशेषात्तु दुरुक्तमपि शोभते ।
नीलं पलाशमाबद्धमन्तराले स्रजामिव ॥ ५४ ॥
किञ्चिदाश्रयसौन्दर्याद्धत्ते शोभामसाध्वपि ।
कान्ताविलोचनन्यस्तं मलीमसमिवाञ्जनम् ॥ ५५ ॥
आपाण्डुगण्डमेतत्ते वदनं वनजेक्षणे ।
सङ्गमात्पाण्डुशब्दस्य गण्डः साधु यथोदितम् ॥५६॥
अनयाऽन्यदपि ज्ञेयं दिशा युक्तमसाध्वपि ।
यथा विक्लिन्नगण्डानां करिणां मदवारिभिः[1] ॥५७॥
मदक्लिन्नकपोलानां द्विरदानां चतुश्शती ।
यथा तद्वदसाधीयः साधीयश्च प्रयोजयेत् ॥ ५८ ॥
एतद् ग्राह्यं सुरभि कुसुमं ग्राम्यमेतन्निधेयं
धत्ते शोभां विरचितमिदं स्थानमस्यैतदस्य ।
मालाकारो रचयति यथा साधु विज्ञाय मालां
योज्यं काव्येष्ववहितधिया तद्वदेवाऽभिधानम् ॥५९॥

इति श्रीभामहालङ्कारे प्रथमः परिच्छेदः ।

---

१ मुदवारिभिः-घ ।

द्वितीयः परिच्छेदः ।

माधुर्यमभिवाञ्छन्तः प्रसादं च सुमेधसः ।
समासवन्ति भूयांसि न पदानि प्रयुञ्जते ॥ १ ॥
केचिदोजोऽभिधित्सन्तः समस्यन्ति बहून्यपि ।
यथा मन्दारकुसुमरेणुपिञ्जरितालका ॥ २ ॥
श्रव्यं नातिसमस्तार्थं काव्यं मधुरमिष्यते ।
आविद्वदङ्गनाबालप्रतीतार्थं प्रसादवत् ॥ ३ ॥
अनुप्रासः सयमको रूपकं दीपकोपमे ।
इति वाचामलङ्काराः पञ्चैवाऽन्यैरुदाहृताः ॥ ४ ॥
सरूपवर्णविन्यासमनुप्रासं प्रचक्षते ।
किंतया चिन्तया कान्ते नितान्तेति यथोदितम् ॥५॥
ग्राम्यानुप्रासमन्यत्तु मन्यन्ते सुधियोऽपरे ।
स लोलमालानीलालिकुलाकुलगलो बलः ॥ ६ ॥
नानार्थवन्तोऽनुप्रासा न चाप्यसदृशाक्षराः ।
युक्त्यानया मध्यमया जायन्ते चारवो गिरः ॥ ७ ॥
लाटीयमप्यनुप्रासमिहेच्छन्त्यपरे यथा ।
दृष्टिं दृष्टिसुखां धेहि चन्द्रश्चन्द्रमुखोदितः ॥ ८ ॥
आदिमध्यान्तयमकं पादाभ्यासं तथावली ।
समस्तपादयमकमित्येतत् पञ्चधोच्यते ॥ ९ ॥

सन्दष्टकसमुद्गादेरत्रैवान्तर्गतिर्मता ।
आदौ मध्यान्तयोर्वा स्यादिति पञ्चैव तद्यथा ॥१०॥
साऽधुना साधुना तेन राजताऽराजताऽऽभृता ।
सहितं सहितं कर्त्तुं सङ्गतं सङ्गतं जनम् ॥ ११ ॥
साधुः संसाराद्बिभ्यदस्मादसारात्
कृत्वा क्लेशान्तं याति वर्त्म प्रशान्तम् ।
जातिं व्याधीनां दुर्नयानामधीनां
वाञ्छन्त्या (ञ्छया?)यस्त्वं छिन्धि मुक्तान(म?)यस्त्वम्॥१२॥
न ते धीर्धीर भोगेषु रमणीयेषु सङ्गता
मुनीनपि हरन्त्येते रमणी येषु सङ्गता ॥ १३ ॥
सितासिताक्षीं सुपयोधराधरां
सुसम्मदां व्यक्तमदां ललामदाम् ।
घना घना नीलघनाघनालकां
प्रियामिमामुत्सुकयन्ति यन्ति च ॥ १४ ॥
अमी नृपा दत्तसमग्रशासना:
कदाचिदप्यप्रतिबद्धशासना: ।
कृतागसां मार्गभिदां च शासना:
पितृक्रमाध्यासितताद्दशासना: ॥ १५ ॥
अनन्तरैकान्तरयोरेवं पादान्तयोरपि ।

---

१ स्यामि (दि ?) ति—ग २ दुर्दयानां—ग

कृत्स्नं च सर्वपादेषु दुष्कृतं साधु तादृशम् ॥ १६ ॥
तुल्यश्रुतीनां भिन्नानामभिधेयैः परस्परम् ।
वर्णानां यः पुनर्वादो यमकं तन्निगद्यते ॥ १७ ॥
प्रतीतशब्दमोजस्वि सुश्लिष्टपदसन्धि च ।
प्रसादि स्वभिधानंच यमकं कृतिनां मतम् ॥ १८ ॥
नानाधात्वर्थगम्भीरा यमकव्यपदेशिनी ।
प्रहेलिका सा ह्युदिता रामशर्माच्युतोत्तरे ॥ १९ ॥
काव्यान्यपि यदीमानि व्याख्यागम्यानि शास्त्रवत् ।
उत्सवः सुधियामेव हन्त ! दुर्मेधसो हताः ॥ २० ॥
उपमानेन यत्तत्त्वमुपमेयस्य रूप्यते ।
गुणानां समतां दृष्ट्वा रूपकं नाम तद्विदुः ॥ २१ ॥
समस्तवस्तुविषयमेकदेशविवर्त्ति च ।
द्विधा रूपकमुद्दिष्टमेतत्तच्चोच्यते यथा ॥ २२ ॥
शीकरा[1]म्भोमदसृजस्तुङ्गा जलददन्तिनः ।
निर्यान्तो मण्डयन्तीमे शक्रकार्मुककाननम्[2] ॥ २३ ॥
तडिद्वलयकक्ष्याणां बलाकामालभारिणाम् ।
पयोमुचां ध्वनिर्धीरो दुनोति मम तां प्रियाम् ॥२४॥
आदिमध्यान्तविषयं त्रिधा दीपकमिष्यते ।

---

१ शीकर०—ग २ निर्यान्तो मदयन्तीमे शक्रकार्मुककारणम्—ग

एकस्यैव त्र्यवस्थत्वादिति तद्भिद्यते त्रिधा ॥ २५ ॥
अमूनि कुर्वतेऽन्वर्थामस्याख्यामर्थदीपनात् ।
त्रिभिर्निदर्शनैश्चेदं त्रिधा निर्दिश्यते यथा ॥ २६ ॥
मदो जनयति प्रीतिं साऽनङ्गं मानभङ्गुरम् ।
स प्रियासङ्गमोत्कण्ठां साऽसह्यां मनसश्शुचम् ॥२७॥
मालिनीरंशुकभृतः स्त्रियोऽलङ्कुरुते मधुः ।
हारीतशुकवाचश्च भूधराणामुपत्यकाः ॥ २८ ॥
चीरीमतीररण्यानीः सरितश्शुष्यदम्भसः ।
प्रवासिनां च चेतांसि शुचिरन्तं निनीषति ॥ २९ ॥
विरुद्धेनोपमानेन देशकालक्रियादिभिः ।
उपमेयस्य यत्साम्यं गुणलेशेन सोपमा ॥ ३० ॥
यथेवशब्दौ सादृश्यमाहतुर्व्यतिरेकिणोः ।
दूर्वाकाण्डमिव श्यामं तन्वी श्यामालता यथा ॥३१॥
विना यथेवशब्दाभ्यां समासाभिहिता परा ।
यथा कमलपत्राक्षी शशाङ्कवदनेति च ॥ ३२ ॥
वतिनापि क्रियासाम्यं तद्वदेवाभिधीयते ।
द्विजातिवदधीतेऽसौ गुरुवच्चानुशास्ति नः ॥ ३३ ॥
समानवस्तुन्यासेन प्रतिवस्तूपमोच्यते ।
यथेवानभिधानेऽपि गुणसाम्यप्रतीतितः ॥ ३४ ॥

१ सानलां—क २ चरीमती-क ३ श्यामा—घ ४ श्यामलता-ग, घ

साधु साधारणत्वादिर्गुणोऽत्र व्यतिरिच्यते ।
स साम्यमापादयति विरोधेऽपि तयोर्यथा ॥ ३५ ॥
कियन्तः सन्ति गुणिनः साधुसाधारणश्रियः ।
स्वादुपाकफलानम्राः कियन्तो वाऽध्वशाखिनः॥ ३६॥
यदुक्तं त्रिप्रकारत्वं तस्याः कैश्चिन्महात्मभिः ।
निन्दाप्रशंसाचिख्यासाभेदादत्राभिधीयते ॥ ३७ ॥
सामान्यगुणनिर्देशात् त्रयमप्युदितं ननु ।
मालोपमादिः सर्वोऽपि न ज्यायान् विस्तरो मुधा॥ ३८॥
हीनतासम्भवो लिङ्गवचोभेदो विपर्ययः ।
उपमानाधिकत्वं च तेनासदृशतापि च ॥ ३९ ॥
त एत उपमादोषाः सप्त मेधाविनोदिताः ।
सोदाहरणलक्ष्माणो वर्ण्यन्तेऽत्र च ते पृथक्॥ ४० ॥

स मारुताकम्पितपीतवासा
विभ्रत् सलीलं शशिभासमब्जम् ।
यदुप्रवीरः प्रगृहीतशार्ङ्गः
सेन्द्रायुधो मेघ इवाबभासे ॥ ४१ ॥

शक्रचापग्रहादत्र दर्शितं किल कार्मुकम् ।
वासश्शङ्खानुपादानाद्धीनमित्यभिधीयते ॥ ४२ ॥
सर्वं सर्वेण सारूप्यं नास्ति भावस्य कस्यचित् ।
यथोपपत्ति कृतिभिरुपमासु प्रयुज्यते ॥ ४३ ॥

अखण्डमण्डलः क्वेन्दुः क्व कान्ताननमद्युति ।
यत्किञ्चित् कान्तिसामान्याच्छशिनैवोपमीयते॥ ४४॥
किञ्चित्काव्यानि नेयानि लक्षणेन महात्मनाम् ।
दृष्टं वा सर्वसारूप्यं राजमित्रे यथोदितम् ॥ ४५ ॥

सूर्यांशुसम्मीलितलोचनेषु
दीनेषु पद्मानिलनिर्मदेषु ।
साध्व्यः स्वगेहेष्विव भर्तृहीनाः
केका विनेशुः शिखिनां मुखेषु ॥ ४६ ॥

निष्पेतुरास्यादिव तस्य दीप्ताः
शरा धनुर्मण्डलमध्यभाजः ।
जाज्वल्यमाना इव वारिधारा
दिनार्द्धभाजः परिवेषिणोऽर्कात् ॥ ४७ ॥

शाखवर्धनस्य ।

कथं पातोऽम्बुधाराणां ज्वलन्तीनां विवस्वतः ।
असम्भवादयं युक्त्या तेनासम्भव उच्यते ॥ ४८ ॥
तत्रासम्भविनार्थेन कः कुर्यादुपमां कृती ।
को नाम वह्निनौपम्यं कुर्वीत शशलक्ष्मणः ॥ ४९ ॥
यस्यातिशयवानर्थः कथं सोऽसम्भवो मतः ।
इष्टं चातिशयार्थत्वमुपमोत्प्रेक्षयोर्यथा ॥ ५० ॥

१ विन्दुः—क

पुञ्जीभूतमिव ध्वान्तमेष भाति मतङ्गजः ।
सरः शरत्प्रसन्नाम्भो नभःखण्डमिवोज्झितम् ॥५१॥
अथ लिङ्गवचोभेदावुच्येते सविपर्ययौ ।
हीनाधिकत्वात् स द्वेधा त्रयमप्युच्यते यथा ॥५२॥
अविगाह्योऽसि नारीणामनन्यमनसामपि ।
विषमोपलभिन्नोर्मिरापगेवोत्तितीर्षतः ॥ ५३ ॥
क्वचिदग्रे प्रसरता क्वचिदापत्य निम्नता ।
शुनेव सारङ्गकुलं त्वया भिन्नं द्विषां बलम् ॥५४॥
अयं पद्मासनासीनश्चक्रवाको विराजते ।
युगादौ भगवान् ब्रह्मा विनिर्मित्सुरिव प्रजाः ॥५५॥
ननूपमीयते पाणिः कमलेन विकासिना ।
अधरो विद्रुमच्छेदभासा बिम्बफलेन च ॥ ५६ ॥
उच्यते काममस्तीदं किन्तु स्त्रीपुंसयोरयम् ।
विधिर्नाभिमतोऽन्यैस्तु त्रयाणामपि नेष्यते ॥५७॥
स पीतवासाः प्रगृहीतशार्ङ्गो मनोज्ञभीमं वपुराप कृष्णः ।
शतह्रदेन्द्रायुधवान्निशायां संसृज्यमानश्शशिनेव मेघः॥५८॥

रामशर्मणः ।

शशिनो ग्रहणादेतदाधिक्यं किल नह्ययम् ।
निर्दिष्ट उपमेयेऽर्थे वाच्यो वा जलदोऽत्र तु ॥ ५९ ॥
न सर्वसारूप्यमिति विस्तरेणोदितो विधिः ।

अभिप्रायात्कवेर्नात्र विधेया जलजे मतिः ॥६०॥
आधिक्यमुपमानानां न्याय्यं[1] नाधिकता भवेत् ।
गोक्षीरकुन्दहालिनां विशुध्या सदृशं यशः ॥ ६१ ॥
एकेनैवोपमानेन[2] ननु सादृश्यमुच्यते ।
उक्तार्थस्य प्रयोगो हि गुरुमर्थं न पुष्यति ॥६२॥

वनेऽथ तस्मिन्वनितानुयायिनः
प्रवृत्तदानार्द्रकटा मतंगजाः ।
विचित्रबर्हाभरणाश्च बर्हिणो
बभुर्दिवीवामलविग्रहा ग्रहाः ॥ ६३ ॥

ग्रहैरपि गजादीनां यदि सादृश्यमुच्यते ।
तथापि तेषां तैरस्ति कान्तिर्वाप्युग्रतापि वा ॥६४॥
इत्युक्त उपमाभेदो वक्ष्यते चापरः पुनः ।
उपमादेरलङ्कारािद्वशेषोऽन्योऽभिधीयते ॥ ६५ ॥
आक्षेपोऽर्थान्तरन्यासो व्यतिरेको विभावना ।
समासातिशयोक्ती च षडलङ्कृतयोऽपराः ॥६६॥
वक्ष्यमाणोक्तविषयस्तत्राक्षेपो द्विधा मतः ।
एकरूपतया शेषा निर्देक्ष्यन्ते यथाक्रमम् ॥ ६७ ॥
प्रतिषेध इवेष्टस्य यो विशेषाभिधित्सया ।
आक्षेप इति तं सन्तः शंसन्ति द्विविधं यथा ॥६८॥

१ न्याय्या–घ। २ एतेनै०–ग।

अहं त्वां यदि नेक्षेय क्षणमप्युत्सुका ततः।
इयदेवास्त्वतोऽन्येन किमुक्तेनाप्रियेण तु ॥ ६९ ॥
त्वत्विक्रमान्तभुत्वाश्चित्रं यन्न तवोद्धतिः।
को वा सेतुरलं सिन्धोर्विकारकरणं प्रति ॥ ७० ॥
उपन्यसनमन्यस्य यदर्थस्योदितादृते।
ज्ञेयः सोऽर्थान्तरन्यासः पूर्वार्थानुगतो यथा ॥ ७१ ॥
परानीकानि भीमानि विविक्षोर्न तव व्यथा।
साधु वाऽसाधु वाऽऽगामि पुंसामात्मैव शंसति ॥ ७२ ॥
हिशब्देनापि हेत्वर्थप्रथनादुक्तसिद्धये।
अयमर्थान्तरन्यासः सुतरां व्यज्यते यथा ॥ ७३ ॥
वहन्ति गिरयो मेघानभ्युपेतान् गुरूनपि।
गरीयानेव हि गुरून् बिभर्ति प्रणयागतान् ॥ ७४ ॥
उपमानवतोऽर्थस्य यद्विशेषनिदर्शनम्।
व्यतिरेकं तमिच्छन्ति विशेषापादनाद्यथा ॥ ७५ ॥
सितासिते पक्ष्मवती नेत्रे ते ताम्रराजिनी।
एकान्तशुभ्रश्यामे तु पुण्डरीकासितोत्पले ॥ ७६ ॥
क्रियायाः प्रतिषेधे या तत्फलस्य विभावना।
ज्ञेया विभावनैवासौ समाधौ सुलभे सति ॥ ७७ ॥
अपीतमत्ताः शिखिनो दिशोऽनुत्कण्ठिताकुलाः।

---

१ त्वा—ग।

नीपोऽविलिप्तसुरभिरभ्रष्टकलुषं जलम् ॥ ७८ ॥
यत्रोक्ते गम्यतेऽन्योऽर्थस्तत्समानविशेषणः ।
सा समासोक्तिरुद्दिष्टा संक्षिप्तार्थतया यथा[1] ॥७९॥
स्कन्धवानृजुरव्यालः स्थिरोऽनेकमहाफलः[2] ।
जातस्तरुरयं चोच्चैः पातितश्च नभस्वता ॥८०॥
निमित्ततो वचो यत्तु लोकातिक्रान्तगोचरम् ।
मन्यन्तेऽतिशयोक्तिं तामलङ्कारतया यथा ॥८१॥
स्वपुष्पच्छविहारिण्या चन्द्रभासा तिरोहिताः ।
अन्वमीयन्त भृङ्गालिवाचा सप्तच्छदद्रुमाः ॥८२॥
अपां यदि त्वक् शिथिला च्युता स्यात् फणिनामिव ।
तदा शुक्लांशुकानि स्युरङ्गेष्वम्भसि योषिताम् ॥८३॥
इत्येवमादिरुदिता गुणातिशययोगतः ।
सर्वैवातिशयोक्तिस्तु तर्कयेत् तां यथागमम् ॥८४॥
सैषा सर्वैव वक्रोक्तिरनयार्थो विभाव्यते ।
यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना ॥८५॥
हेतुश्च सूक्ष्मो लेशोऽथ नालङ्कारतया मतः ।
समुदायाऽभिधानस्य वक्रोक्त्यनभिधानतः ॥ ८६ ॥
गतोऽस्तमर्को भातीन्दुर्यान्ति वासाय पक्षिणः ।
इत्येवमादि किं काव्यं वार्त्तामेनां प्रचक्षते ॥८७॥

---

१. संक्षिप्तार्थां यथा तथा–क । २. स्थिरोऽङ्क–ख ।

यथासङ्ख्यमथोत्प्रेक्षामलङ्कारद्वयं विदुः ।
सङ्ख्यानमिति मेधाविनोत्प्रेक्षाभिहिता क्वचित् ॥८८॥
भूयसामुपदिष्टानामर्थानामसधर्मणाम् ।
क्रमशो योऽनुनिर्देशो यथासङ्ख्यं तदुच्यते ॥८९॥
पद्मेन्दुभृङ्गमातङ्गपुंस्कोकिलकलापिनः ।
वक्त्रकान्तीक्षणगतिवाणीबालैस्त्वया जिताः ॥९०॥
अविवक्षितसामान्या किञ्चिच्चोपमया सह ।
अतद्गुणक्रियायोगादुत्प्रेक्षातिशयान्विता ॥ ९१ ॥
किंशुकव्यपदेशेन तरुमारुह्य सर्वतः ।
दग्धाऽदग्धमरण्यान्याः पश्यतीव विभावसुः ॥९२॥
स्वभावोक्तिरलङ्कार इति केचित् प्रचक्षते ।
अर्थस्य तदवस्थत्वं स्वभावोऽभिहितो यथा ॥९३॥
आक्रोशन्नाह्वयन्नन्यानाधावन्मण्डलैर्नुदन् ।
गा वारयति दण्डेन डिम्भः शस्यावतारणीः ॥९४॥
समासेनोदितमिदं धीखेदायैव विस्तरः ।
असंगृहीतमप्यन्यदभ्यूह्यमनया दिशा ॥ ९५ ॥
स्वयंकृतैरेवनिदर्शनैरियं मया प्रक्लृप्ता खलु वागलङ्कृतिः ।
अतः परं चारुरनेकधापरो गिरामलङ्कारविधिर्विधास्यते॥९६॥

इति श्रीभामहालङ्कारे द्वितीयः परिच्छेदः ।

अथ तृतीयः परिच्छेदः ।

प्रेयो रसवदूर्जस्वि पर्यायोक्तं समाहितम् ।
द्विप्रकारमुदात्तं च भेदैः श्लिष्टमपि त्रिभिः ॥ १ ॥
अपह्नुतिं विशेषोक्तिं विशेषं तुल्ययोगिताम् ।
अप्रस्तुतप्रशंसां च व्याजस्तुतिनिदर्शने ॥ २ ॥
उपमारूपकं चान्यदुपमेयोपमामपि ।
सहोक्तिपरिवृत्ती च ससन्देहमनन्वयम् ॥ ३ ॥
उत्प्रेक्षावयवं चान्ये संसृष्टमपि चापरे ।
भाविकत्वं च निजगुरलङ्कारं सुमेधसः ॥ ४ ॥
प्रेयो गृहागतं कृष्णमवादीद्विदुरो यथा ।
अद्य या मम गोविन्द जाता त्वयि गृहागते ।
कालेनैषा भवेत् प्रीतिस्तवैवागमनात् पुनः ॥ ५ ॥
रसवद् दर्शितस्पष्टशृङ्गारादिरसं यथा ।
देवी समागमद् धर्ममस्करण्यतिरोहिता ॥ ६ ॥
ऊर्जस्वि कर्णेन यथा पार्थाय पुनरागतः ।
द्विः सन्दधाति किं कर्णः शल्येत्यहिरपाकृतः ॥ ७ ॥
पर्यायोक्तं यदन्येन प्रकारेणाभिधीयते ।
उवाच रत्नाहरणे चैद्यं शार्ङ्गधनुर्यथा ॥ ८ ॥
गृहेष्वध्वसु वा नान्नं भुञ्ज्महे यदधीतिनः ।

न भुञ्जते द्विजास्तच्च रसदाननिवृत्तये ॥ ९ ॥
समाहितं राजमित्रे यथा क्षत्रिययोषिताम् ।
रामप्रसक्त्यै यान्तीनां पुरोऽदृश्यत नारदः ॥१०॥
उदात्त[1]शक्तिमान् रामो गुरुवाक्यानुरोधकः ।
विहायोपनतं[2] राज्यं यथा वनमुपागमत् ॥ ११ ॥
एतदेवापरेऽन्येन व्याख्यानेनान्यथा विदुः ।
नानारत्नादियुक्तं यत्तत् किलोदात्तमुच्यते ॥१२॥
चाणक्यो नक्तमुपयान्नन्दक्रीडागृहं यथा ।
शशिकान्तोपलच्छन्नं विवेद पयसां ग(क ?)णैः ॥१३॥
उपमानेन यत्तत्त्वमुपमेयस्य साध्यते ।
गुणक्रियाभ्यां नाम्ना च श्लिष्टं तदभिधीयते ॥ १४ ॥
लक्षणं रूपकेऽपीदं लक्ष्यते काममत्र तु ।
इष्टः प्रयोगो युगपदुपमानोपमेययोः ॥१५॥
शीकराम्भोमदसृजस्तुङ्गा जलददन्तिनः ।
इत्यत्र मेघकरिणां निर्देशः क्रियते समम् ॥१६॥
श्लेषादेवार्थवचसोरस्य च क्रियते भिदा ।
तत्सहोक्त्युपमाहेतुनिर्देशात्[3] क्रमशो यथा ॥ १७ ॥
छायावन्तो गतव्यालाः स्वारोहाः फलदायिनः ।

---

१. उद्धातं-ग । २. पवनं-ग ।
३ हेतुर्निर्देशा-घ ।

मार्गद्रुमा महान्तश्च परेषामेव भूतये ॥ १८ ॥
उन्नतालोकदयिता महान्तः प्राज्यवर्षिणः ॥
शमयन्ति क्षितेस्तापं सुराजानो घना इव ॥ १९ ॥
रत्नवत्त्वादगाधत्वात् स्वमर्यादाविलङ्घनात् ।
बहुसत्त्वाश्रयत्वाच्च सदृशत्वमुदन्वता ॥ २० ॥
अपह्नुतिरभीष्टा च किञ्चिदन्तर्गतोपमा ।
भूतार्थापह्नवादस्याः क्रियते चाभिधा यथा ॥ २१ ॥
नेयं विरौति भृङ्गाली मदेन मुखरा मुहुः ।
अयमाकृष्यमाणस्य[1] कन्दर्पधनुषो ध्वनिः ॥ २२ ॥
एकदेशस्य विगमे या गुणान्तरसंस्थितिः ।
विशेषप्रथनायासौ विशेषोक्तिर्मता यथा ॥ २३ ॥
स एकस्त्रीणि जयति जगन्ति कुसुमायुधः ।
हरतापि तनुं यस्य शम्भुना न हृतं बलम् ॥ २४ ॥
गुणस्य वा क्रियाया वा विरुद्धान्यक्रियाभिधा ।
या विशेषाभिधानाय विरोधं तं विदुर्बुधाः ॥२५॥
उपान्तरूढोपवनच्छायाशीतापि धूरसौ ।
विदूरदेशानपि वः सन्तापयति विद्विषः ॥ २६ ॥
न्यूनस्यापि विशिष्टेन गुणसाम्यविवक्षया ।
तुल्यकार्यक्रियायोगादित्युक्ता तुल्ययोगिता ॥ २७ ॥

---

१ आक्रन्दमाणस्य-ग ।

शेषो हिमगिरिस्त्वं च महान्तो गुरवः स्थिराः।
यदलङ्घितमर्यादाश्चलन्तीं विभृथ क्षितिम् ॥२८॥
अधिकारादपेतस्य वस्तुनोऽन्यस्य या स्तुतिः।
अप्रस्तुतप्रशंसेति सा चैवं कथ्यते यथा ॥ २९ ॥
प्रीणितप्रणयि स्वादु काले परिणतं बहु।
विना पुरुषकारेण फलं पश्यत शाखिनाम् ॥ ३० ॥
दूराधिकगुणस्तोत्रव्यपदेशेन तुल्यताम्।
किञ्चिद्विधित्सोर्या निन्दा व्याजस्तुतिरसौ यथा॥३१॥
रामः सप्ताभिनत् सा(ता?)लान् गिरिं क्रौञ्चं भृगूत्तमः।
शतांशेनापि भवता किं तयोः सदृशं कृतम् ॥३२॥
क्रिययैव विशिष्टस्य तदर्थस्योपदर्शनात्।
ज्ञेया निदर्शना नाम यथेववतिभिर्विना ॥ ३३ ॥
अयं मन्दद्युतिर्भास्वानस्तं प्रति यियासति।
उदयः पतनायेति श्रीमतो बोधयन्नरान् ॥ ३४ ॥
उपमानेन तद्भावमुपमेयस्य साधयत्।
यां वदत्युपमामेतदुपमारूपकं यथा ॥ ३५ ॥
समग्रगगनायाममानदण्डो रथाङ्गिनः।
पादो जयति सिद्धस्त्रीमुखेन्दुनवदर्पणः॥३६॥
उपमानोपमेयत्वं यत्र पर्यायतो भवेत्।

---

१ बिभ्रति—क।

उपमेयोपमां नाम ब्रुवते तां यथोदिताम् ॥३७॥
सुगन्धि नयनानन्दि मदिरामदपाटलम् ।
अम्भोजमिव वक्त्रं ते त्वदास्यमिव पङ्कजम् ॥३८॥
तुल्यकाले क्रिये यत्र वस्तुद्वयसमाश्रये ।
पदेनैकेन कथ्येते सहोक्तिः सा मता यथा ॥३९॥
हिमपातात्रिलदिशो गाढालिङ्गनहेतवः ।
वृद्धिमायान्ति यामिन्यः कामिनां प्रीतिभिः सह ॥४०॥
विशिष्टस्य यदादानमन्यापोहेन वस्तुनः ।
अर्थान्तरन्यासवती परिवृत्तिरसौ यथा ॥ ४१ ॥
प्रदाय वित्तमर्थिभ्यः स यशोधनमादितः ।
सतां विश्वजनीनानामिदमस्खलितं व्रतम् ॥ ४२ ॥
उपमानेन तत्त्वं च भेदं च वदतः पुनः ।
ससन्देहं वचः स्तुत्यै ससन्देहं विदुर्यथा ॥ ४३ ॥
किमयं शशी न स दिवा विराजते
कुसुमायुधो न धनुरस्य कौसुमम् ।
इति विस्मयाद्विमृशतोऽपि मे मति-
स्त्वयि वीक्षते न लभतेऽर्थनिश्चयम् ॥४४॥
यत्र तेनैव तस्य स्यादुपमानोपमेयता ।
असादृश्यविवक्षातस्तमित्याहुरनन्वयम् ॥ ४५ ॥
ताम्बूलरागवलयं स्फुरद्दशनदीधिति ।

इन्दीवराभनयनं तवेव वदनं तव ॥ ४६ ॥
श्लिष्टस्यार्थेन संयुक्तः किञ्चिदुत्प्रेक्षयान्वितः।
रूपकार्थेन च पुनरुत्प्रेक्षावयवो यथा ॥ ४७ ॥
तुल्योदयावसानत्वाद् गतेऽस्तं प्रति भास्वति।
वासाय वासरः क्लान्तो विशतीव तमोगृहम् ॥४८॥
वरा विभूषा संसृष्टिर्बह्वलङ्कारयोगतः।
रचिता रत्नमालेव सा चैवमुदिता यथा ॥ ४९ ॥
गाम्भीर्यलाघववतोर्युवयोः प्राज्यरत्नयोः।
सुखसेव्यो जनानां त्वं दुष्टग्राहोऽम्भसां पतिः ॥५०॥
अनलङ्कृतकान्तं ते वदनं वनजद्युति।
निशाकृतः[1] प्रकृत्यैव चारोः का वास्त्यलङ्कृतिः ॥५१॥
अन्येषामपि कर्त्तव्या संसृष्टिरनया दिशा।
कियदुद्घाटितज्ञेभ्यः शक्यं कथयितुं मया ॥ ५२ ॥
भाविकत्वमिति प्राहुः प्रबन्धविषयं गुणम्।
प्रत्यक्षा इव दृश्यन्ते यत्रार्था भूतभाविनः ॥५३॥
चित्रोदात्ताद्भुतार्थत्वं कथायाः स्वभिनीतता[2]।
शब्दानाकुलता चेति तस्य हेतुं प्रचक्षते ॥५४॥
आशीरपि च केषाञ्चिदलङ्कारतया मता।
सौहृदय्या(स्या?)विरोधोक्तौ प्रयोगोऽस्याश्च तद्यथा ॥५५॥

---

१ निशाकृतं—ग। २ स्वविनीतता—घ।

अस्मिन् जहीहि सुहृदि प्रणयाभ्यसूया-
माश्लिष्य गाढममुमानतमादरेण ।
विन्ध्यं महानिव घनः समयेऽभिवर्ष-
न्नानन्दजैर्नयनवारिभिरुक्षतु त्वाम् ॥ ५६ ॥

मदान्धमातङ्गविभिन्नसाला
हतप्रवीरा द्रुतभीतपौराः ।
त्वत्तेजसा दग्धसमस्तशोभा
द्विषां पुरः पश्यतु राजलोकः ॥ ५७ ॥

गिरामलङ्कारविधिः सविस्तरः
स्वयं विनिश्चित्य धिया मयोदितः ।
अनेन वागर्थविदामलङ्कृता
विभाति नारीव विदग्धमण्डना ॥ ५८ ॥

इति भामहालङ्कारे तृतीयः परिच्छेदः ॥

अथ चतुर्थः परिच्छेदः ॥

अपार्थं व्यर्थमेकार्थं ससंशयमपक्रमम् ।
शब्दहीनं यतिभ्रष्टं भिन्नवृत्तं विसन्धि च ॥ १ ॥
देशकालकलालोकन्यायागमविरोधि च ।
प्रतिज्ञाहेतुदृष्टान्तहीनं दुष्टं च नेष्यते ॥ २ ॥
अपार्थमित्यपेतार्थं स चार्थः पदवाक्ययोः ।
अर्थवान् वर्णसंघातः सुप्तिङन्तं पदं पुनः ॥ ३ ॥
पदानामेव संघातः सापेक्षाणां परस्परम् ।
निराकाङ्क्षं च तद्वाक्यमेकवस्तुनिबन्धनम् ॥ ४ ॥
क्रमवृत्तिषु वर्णेषु संघातादि न युज्यते ।
बुद्धौ तु सम्भवत्येतदन्यत्वेऽपि प्रतिक्षणम् ॥ ५ ॥
धीरन्त्यशब्दविषया वृत्तवर्णाहितस्मृतिः ।
वाक्यमित्याहुरपरे न शब्दाः क्षणनश्वराः ॥ ६ ॥
अत्रापि बहु वक्तव्यं जायते तत्तु नोदितम् ।
गुरुभिः किं विवादेन यथाप्रकृतमुच्यते ॥ ७ ॥
समुदायार्थशून्यं यत्तदपार्थकमिष्यते ।
दाडिमानि दशाऽपूपाः षडित्यादि यथोदितम् ॥ ८ ॥

---

१ धीरन्त्यशब्दविषयावृत्तवर्णाहितस्मृतिः–ग० ।

निरुद्धार्थं मतं व्यर्थं विरुद्धं तूपदिश्यते ।
पूर्वाऽपरार्थव्याघाताद्विपर्ययकरं यथा ॥ ९ ॥
सखि मानं प्रिये धेहि लघुतामस्य मा गमः ।
भर्तुश्छन्दानुवर्त्तिन्यः प्रेम घ्नन्ति न हि स्त्रियः ॥१०॥
उपासितगुरुत्वात्त्वं विजितेन्द्रियशत्रुषु ।
श्रेयसो विनयाधानमधुना तिष्ठ केवलम् ॥ ११ ॥
यदभिन्नार्थमन्योन्यं तदेकार्थं प्रचक्षते ।
पुनरुक्तमिदं प्राहुरन्ये शब्दार्थभेदतः ॥ १२ ॥
न शब्दपुनरुक्तं तु स्थौल्यादत्रोपवर्ण्यते ।
कथमाक्षिप्तचित्तः सन्नुक्तमेवाऽभिधास्यते ॥ १३ ॥
भयशोकाभ्यसूयासु हर्षविस्मययोरपि ।
यथाह गच्छ गच्छेति पुनरुक्तं च तद्विदुः ॥ १४ ॥
अत्रार्थपुनरुक्तं यत्तदेवैकार्थमिष्यते ।
उक्तस्यपुनराख्याने कार्यासम्भवतो यथा ॥ १५ ॥
तामुत्कमनसं नूनं करोति ध्वनिरम्भसाम् ।
सौधेषु घनमुक्तानां प्रणालीमुखपातिनाम् ॥ १६ ॥
श्रुतेः सामान्यधर्माणां विशेषस्याऽनुदाहृतेः ।
अप्रतिष्ठं यदेकत्र तज्ज्ञानं[3] संशयं विदुः ॥ १७ ॥

---

१ विरुद्धार्थम्–ग०
२ न–ग० ।   ३ यदत्रैतज्ज्ञानं (यदेकत्र तज्ज्ञानं ?)–ग० ।

ससंशयमिति प्राहुस्ततस्तज्जननं वचः ।
इष्टं निश्चितये वाक्यं न वेलायेति (वेलायति?) तद्यथा १८
व्यालवन्तो दुरारोहा रत्नवन्तः फलान्विताः ।
विषमा भूभृतस्तेभ्यो भयमाशु प्रमादिनाम् ॥ १९ ॥
यथोपदेशं क्रमशो निर्देशोऽत्र क्रमो मतः ।
तदपेतं विपर्यासादित्याख्यातमपक्रमम् ॥ २० ॥
विदधानौ किरीटेन्दू श्यामाभ्रहिमसच्छवी ।
रथाङ्गशूले बिभ्राणौ पातां वः शम्भुशार्ङ्गिणौ ॥ २१ ॥
सूत्रकृत्पादकारेष्टप्रयोगाद्योऽन्यथा भवेत् ।
तमाप्तश्रावकाः सिद्धेः[1] शब्दहीनं विदुर्यथा ॥ २२ ॥
स्फुरत्तडिद्वलयिनो विततास्भोगरीयसः ।
तेजस्तिरयतः सौरं घनान् पश्य दिवाऽभितः[2] ॥ २३ ॥
यतिश्छन्दो[3] निरूढानां[4] शब्दानां या विचारणा ।
तदपेतं यतिभ्रष्टमिति निर्दिश्यते यथा ॥ २४ ॥
विद्युत्वन्तस्तमालासितवपुष इमे वारिवाहा ध्वनन्ति ।
गुरोर्लघोश्च वर्णस्य योऽस्थाने रचनाविधिः ।
तन्न्यूनाधिकता वापि भिन्नवृत्तमिदं यथा ॥ २५ ॥
भ्रमति भ्रमरमाला काननेषून्मदासौ ।
विरहितरमणीकोऽर्हस्यद्य गन्तुम् ॥ २६ ॥

---

१ तमाप्तश्रावकासिद्धेः-घ० । २ दिवोऽभितः-घ० ।
३ यतिच्छन्दो-घ० । ४ ऽधिरूढानां-क० ।

कान्ते इन्दुशिरोरत्ने आदधाने उदंशुनी ।
पातां वः शम्भुशर्वाण्यावितिं प्राहुर्विसन्ध्यदः ॥२७॥
या देशे द्रव्यसंभूतिरपि वा नोपदिश्यते ।
तत्तद्विरोधि विज्ञेयं स्वभावात्तद्यथोच्यते ॥२८॥
मलये कन्दरोपान्तरूढकालागुरुद्रुमे ।
सुगन्धिकुसुमानम्रा राजन्ते देवदारवः ॥२९॥
षण्णामृतूनां भेदेन कालः षोढेव भिद्यते ।
तद्विरोधकृदित्याहुर्विपर्यासादिदं यथा ॥ ३० ॥
उदूढशिशिरासारान् प्रावृषेण्यान् नभस्वतः ।
फुल्लाः सुरभयन्तीमे चूताः काननशोभिनः ॥३१॥
कला सङ्कलनाप्रज्ञा शिल्पान्यस्याश्च गोचरः ।
विपर्यस्तं तथैवाहुस्तद्विरोधकरं यथा ॥३२॥
ऋषभात्पञ्चमात्तस्मात सषड्जं धैवतं स्मृतम् ।
अयं हि मध्यमग्रामो मध्यमोत्पीडितर्षभः ॥३३॥
इति सा धारितं मोहादन्यथैवाऽवगच्छति ।
अन्यास्वपि कलास्वेवमभिधेया विरोधिता ॥ ३४ ॥
स्थास्नुजङ्गमभेदेन लोकं तत्त्वविदो विदुः ।
स च तद्व्यवहारोऽत्र तद्विरोधकरं यथा ॥३५॥

---

१ उदूद–घ० । २ प्रज्ञाः–घ० ।
३ अन्यथैव–घ० ।

तेषां कटतटभ्रष्टैर्गजानां मदबिन्दुभिः ।
प्रावर्त्तत नदी घोरा हस्त्यश्वरथवाहिनी ॥३६॥
धावतां सैन्यवाहानां फेनवारि मुखच्युतम् ।
चकार जानुदघ्नापान् प्रतिदिङ्मुखमध्वनः ॥३७॥
न्यायः शास्त्रं त्रिवर्गोक्तिर्दण्डनीतिं च तां विदुः ।
अतो न्यायविरोधीष्टमपेतं यत्तया यथा ॥३८॥
विजिगीषुमुपन्यस्य वत्सेशं वृद्धदर्शनम् ।
तस्यैव कृतिनः पश्चादभ्यधाच्चा[1]रशून्यताम् ॥३९॥
अन्तर्योधशता[2]कीर्णं सालङ्कायननेतृकम्[3] ।
तथाविधं गजच्छद्म नाऽज्ञासीत् स स्वभूगतम् ॥४०॥
यदि वोपेक्षितं तस्य सचिवैः स्वार्थसिद्धये ।
अहो नु मन्दिमा तेषां भक्तिर्वा नास्ति भर्तरि ॥४१॥
शरा दृढधनुर्मुक्ता मन्युमद्भिररातिभिः ।
मर्माणि परिहृत्याऽस्य पतिष्यन्तीति काऽनुमा ॥४२॥
हतोऽनेन मम भ्राता मम पुत्रः पिता मम ।
मातुलो भागिनेयश्च रुषा संरब्धचेतसः ॥४३॥
अस्यन्तो विविधान्याऽऽजावायुधान्यपराधिनम् ।
एकाकिनमरण्यान्यां न हन्युर्बहवः कथम् ॥४४॥

---

१ वा (स्वा ?)—ग० । २ अन्तर्योधं शताकीर्णं-घ० ।
३ नेत्र कम्-ग, नेत्रकम् क० ।

नमोऽस्तु तेभ्यो विद्वद्भ्यो येऽभिप्रायं कवेरिमम् ।
शास्त्रलोकावपास्यैवं नयन्ति नयवेदिनः ॥४५॥
सचेतसो वनेभस्य चर्मणा निर्मितस्य च ।
विशेषं वेद बालोऽपि कष्टं किं नु कथं नु तत् ॥४६॥
आगमो धर्मशास्त्राणि लोकसीमा च तत्कृता ।
तद्विरोधि तदाचारव्यतिक्रमणतो यथा ॥४७॥
भूभृतां पीतसोमानां न्याय्ये वर्त्मनि तिष्ठताम् ।
अलङ्करिष्णुना वंशं गुरौ सति जिगीषुणा ॥४८॥
अभार्योढेन संस्कारमन्तरेण द्विजन्मना ।
नरवाहनदत्तेन वेश्यावान् निशि पीडितः ॥४९॥

न दूषणायाऽयमुदाहृतो विधि-
र्न चाभिमानेन किमु प्रतीयते ।
कृतात्मनां तत्त्वदृशां च मादृशो
जनोऽभिसन्धिं क इवाऽवभोत्स्यते ॥ ५० ॥

इति श्रीभामहालङ्कारे चतुर्थः परिच्छेदः ।

---

१ तु-क० ।

अथ पञ्चमः परिच्छेदः ।

अथ प्रतिज्ञाहेत्वादिहीनं दुष्टं च वर्ण्यते ।
समासेन यथान्यायं तन्मात्रार्थप्रतीतये ॥ १ ॥
प्रायेण दुर्बोधतया शास्त्राद् विभ्यत्यमेधसः ।
तदुपच्छन्दनायैष हेतुन्यायलवोच्चयः[1] ॥ २ ॥
स्वादुकाव्यरसोन्मिश्रं शास्त्रमप्युपयुञ्जते ।
प्रथमालीढमधवः पिबन्ति कटु भेषजम् ॥ ३ ॥
न स शब्दो न तद्वाच्यं[2] न स न्यायो न सा कला ।
जायते यन्न काव्याङ्गमहो भारो महान् कवेः ॥ ४ ॥
सत्त्वादयः प्रमाणाभ्यां प्रत्यक्षमनुमा च ते ।
असाधारणसामान्यविषयत्वं तयोः किल ॥ ५ ॥
प्रत्यक्षं कल्पनापोढं ततोऽर्थादिति केचन ।
कल्पनां नाम जात्यादियोजनां प्रतिजानते[3] ॥ ६ ॥
समारोपः किलैतावान् सदर्थालम्बनं च तत् ।
जात्याद्यपोहे वृत्तिः क्व क्व विशेषः कुतश्च सः ॥ ७ ॥
तदपोहेषु च तथा सिद्धा सा बुद्धिगोचरा ।
अवस्तुकं चेद्वितथं[4] प्रत्यक्षं तत्त्ववृत्ति हि ॥ ८ ॥

---

१ 'लवो'-क० । २ तद्वाक्यं-क० । ३ प्रतिजन्यते-घ० । ४ द्वितयं-घ० ।

ग्राह्यग्राहकभेदेन विज्ञानांशो मतो यदि ।
विज्ञानमत्र सादृश्याद्विशेषोऽस्य[1] विकल्पना ॥ ९ ॥
अर्थादेवेति रूपादेस्तत एवेति नान्यतः[2] ।
अन्यथा[3] घटविज्ञानमन्येन व्यपदिश्यते ॥ १० ॥
त्रिरूपाल्लिङ्गतो ज्ञानमनुमानञ्च केचन[4] ।
तद्विदो नान्तरीयार्थदर्शनं चाऽपरं विदुः ॥ ११ ॥
विविधास्पदधर्मेण धर्मीकृतविशेषणः ।
पक्षस्तस्य च निर्देशः प्रतिज्ञेत्यभिधीयते ॥ १२ ॥
तदर्थहेतुसिद्धान्तसर्वा[5]गमविरोधिनी ।
विरुद्धधर्मा प्रत्यक्षबाधिनी[6] चेति दुष्यति ॥ १३ ॥
तथैव हि तदर्थस्य विरोधकरणं यथा ।
यतिर्मम पिता बाल्यात् सूनुर्यस्याऽहमौरसः ॥ १४ ॥
अस्त्यात्मा[7] प्रकृतिर्वेति ज्ञेया हेत्वपवादिनी ।
धर्मिणोऽस्याऽप्रसिद्धत्वात्तद्धर्मोऽपि[8] न सेत्स्यति ॥ १५ ॥
शाश्वतोऽशाश्वतो वेति प्रसिद्धे धर्मिणि ध्वनौ ।
जायते भेदविषयो विवादो वादिनोर्मिथः[9] ॥ १६ ॥

---

१ ०स (स्य ?)-ग० ।   २ न्यायतः-ग० ।
३ अन्यदा-ख, घ० ।   ४ केन च (केचन ?)-ग० ।
५ प्रसिद्ध-ग० ।   ६ वादिनी-ख. घ० ।
७ अस्यात्मा-ग० ।   ८ तदर्थोऽपि-क०
९ वादिनो मिथः-घ, धाविनो मिथः-क०

स्वसिद्धान्तविरोधित्वाद्विज्ञेया तद्विरोधिनी ।
कणभक्षो यथा शब्दमाचक्षीताऽविनश्वरम् ॥ १७ ॥
सर्वशास्त्रविरुद्धत्वात्सर्वागमविरोधिनी ।
यथा शुचिस्तनुः स्त्रैणी तत्प्रमाणानि सन्ति वा[1] ॥ १८ ॥
आकुमारमसन्दिग्धधर्माहितविशेषणा ।
प्रसिद्धधर्मेति मता श्रोत्रग्राह्यो ध्वनिर्यथा ॥ १९ ॥
प्रत्यक्षबाधिनी तेन प्रमाणेनैव बाध्यते ।
यथा शीतोऽनलो नास्ति रूप[2]मुष्णः क्षपाकरः ॥ २० ॥
सन् पक्षे[3] सदृशे सिद्धो व्यावृत्तस्तद्विपक्षतः ।
हेतुस्त्रिलक्षणो ज्ञेयो हेत्वाभासो विपर्ययात् ॥ २१ ॥
सन् द्वयोरिति यः सिद्धः स्वपक्षपरपक्षयोः ।
अभिन्नलक्षणः पक्षः फलभेदादयं द्विधा ॥ २२ ॥
परपक्षानुपादानं तद्वृत्तेश्चानुदाहृतौ ।
कथमन्यतरासिद्धहेत्वाभासव्यवस्थितिः ॥ २३ ॥
साध्यधर्मानुगमतः सदृशस्तत्र यश्च सन् ।
अन्योऽप्यसावेक इव सामान्यादुपचर्यते ॥ २४ ॥
विपक्षस्तद्विसदृशो व्यावृत्तस्तत्र यो ह्यसन् ।
इति द्वयैकानुगतिर्व्यावृत्तिर्लक्ष्मसाधुता[4] ॥ २५ ॥

---

१ यथा शुचिस्तनुस्त्रीणि प्रमाणानि (न ?) सन्ति वा–ग० ।
२ कूप–क० । ३ द्वयो–ग० ।
४ इति द्वयैकानुगतिव्यावृत्ती लक्ष्मसाधुना–घ०

साध्यसाधनधर्माभ्यां सिद्धो दृष्टान्त उच्यते ।
तद्विपर्ययतो वापि तदाभस्तदवृत्तितः ॥ २६ ॥
साध्येन लिङ्गानुगतिस्तदभावे च नास्तिता ।
ख्याप्यते येन दृष्टान्तः स किलान्यैर्द्विधोच्यते ॥२७॥
दूषणन्यूनताद्युक्तिर्न्यूनं हेत्वादिनाऽत्र[1] च ।
तन्मूलत्वात्कथायाश्च न्यूनं नेष्टं प्रतिज्ञया ॥ २८ ॥
जातयो दूषणाभासास्ताः साधर्म्यसमादयः ।
तासां प्रपञ्चो बहुधा भूयस्त्वादिह नोदितः ॥ २९ ॥
अपरं वक्ष्यते न्यायलक्षणं काव्यसंश्रयम् ।
इदं तु शास्त्रगर्भेषु काव्येष्वभिहितं यथा ॥ ३० ॥
अथ नित्याऽविनाभावि दृष्टं जगति कारणम् ।
कारणं चेन्न तन्नित्यं नित्यं चेत्[2] कारणं न तत् ॥३१॥
लक्ष्मप्रयोगदोषाणां भेदेनानेक[3]वर्त्मना ।
सन्धादिसाधनं सिद्धयै शास्त्रेषूदितमन्यथा ॥ ३२ ॥
तज्ज्ञैः काव्यप्रयोगेषु तत्प्रादुष्कृतमन्यथा ।
तत्र लोकाश्रयं काव्यमागमास्तत्त्वदर्शिनः[4] ॥ ३३ ॥
असिसङ्काशमाकाशं शब्दो दूरानुपात्ययम् ।
तदेव वाऽपि सिन्धूनामहो स्थेमा महार्चिषः ॥ ३४ ॥

१ ऽथ-ग० । २ नित्यश्चेत्—घ० ।
३ ०न-क । ४ दर्शिनः ग० ।

रूपादीनां यथा द्रव्यमाश्रयो नश्वरीति या ।
इष्टकार्याभ्युपगमं प्रतिज्ञां प्रतिजानते ॥ ३५ ॥
धर्मार्थकामकोपानां संश्रयात् सा चतुर्विधा ।
जरामेष बिभर्मीति प्रतिज्ञाय पितुर्यथा ॥
तथैव पुरुणाभारि सा स्याद्धर्मनिबन्धनी ॥ ३६ ॥
उपलप्स्ये स्वयं सीतामिति भर्तृनिदेशतः ।
हनूमता प्रतिज्ञाय सा ज्ञातेत्यर्थसंश्रया ॥ ३७ ॥
आहरिष्याम्यमुमद्य महासेनात्मजामिति ।
कृत्वा प्रतिज्ञां वत्सेन हृतेति मदनाश्रया ॥ ३८ ॥
भ्रातुर्भ्रातृव्यमुन्मथ्य पास्याम्यस्याऽसृगाहवे ।
प्रतिज्ञाय यथा भीमस्तच्चकाराऽवशो रुषा ॥ ३९ ॥
कार्योऽन्यत्र प्रतिज्ञायाः प्रयोगो न कथञ्चन ।
परित्यागस्य कर्तव्यो नासां चतसृणामपि ॥ ४० ॥
प्रायोपवेशाय यथा प्रतिज्ञाय सुयोधनः ।
राज्याय पुनरुत्तस्थाविति धर्मविरोधिनी ॥ ४१ ॥
आहूतो न निवर्तेय[1] द्यूतायेति युधिष्ठिरः ।
कृत्वा सन्धां शकुनिना दिदेवेत्यर्थबाधिनी ॥ ४२ ॥
अद्यारभ्य निवत्स्यामि मुनिवद् वचनादिति ।
पितुः प्रियाय यां भीष्मश्चक्रे सा कामबाधिनी ॥ ४३ ॥

१ निवर्तेऽहं-ग ।

अस्याजयद्यथा रामः सर्वक्षत्रवधाश्रयाम् ।[1]
जामदग्न्यं युधा जित्वा सा ज्ञेया कोपबाधिनी ॥४४॥
अथाऽभ्युपगमप्राप्तिः सन्धाऽभ्युपगमाद्विना ।
अनुक्तमपि यत्रार्थादभ्युपैति यथोच्यते ॥ ४५ ॥
किमिन्द्रियद्विषां[2] ज्ञेयं को निराकृतयेऽरिभिः ।
को वा गत्वरमर्थिभ्यो न यच्छति धनं लघु ॥४६॥
किमत्ययं तु यः क्षेपः सौकर्य्यं दर्शयत्यसौ ।
हेतुस्त्रिलक्ष्मैव मतः काव्येष्वपि सुमेधसाम् ॥ ४७ ॥
अन्वयव्यतिरेकौ हि केवलावर्थसिद्धये ।
यथाऽभितो वनाभोगमेतदस्ति महत्सरः ॥ ४८ ॥
कूजनात्कुरराणां च कमलानां च सौरभात् ।
अन्यधर्मोऽपि तत्सिद्धिं सम्बन्धेन करोत्ययम् ॥४९॥
धूमादभ्रङ्कषात्साग्नेः प्रदेशस्यानुमामिव ।
अपृथक्कृतसाध्योऽपि हेतुश्चात्र प्रतीयते ॥ ५० ॥
अन्वयव्यतिरेकाभ्यां विनैवा[3]र्थगतिर्यथा ।
दीप्रदीपा निशा जज्ञे व्यपवृत्तदिवाकरा ॥ ५१ ॥
हेतुप्रदीपदीपत्वमपवृत्तौ रवेरिह ।
तस्याऽपि सुधियामिष्टा दोषाः प्रागुदितास्त्रयः ॥५२॥
अज्ञानसंशयज्ञानविपर्ययकृतो यथा ।

---

१ यथा-ग । २ द्विषां-क । ३ ०वा०-क ।

काशा हरन्ति हृदयममी कुसुमसौरभात् ॥ ५३ ॥
अप्यामभ्यर्णवर्त्तित्वादेते ज्ञेयाः शरारवः ।
असौ शुक्लान्तनेत्रत्वाच्चकोर इति गृह्यताम् ॥ ५४ ॥
तुल्यजातावदृष्टत्वात्साधर्म्यस्य चकोरताम् ।
उक्तस्यार्थस्य दृष्टान्तं प्रतिबिम्बनिदर्शनम् ॥ ५५ ॥
ननूपमानमेवास्तु न हेत्वनभिधानतः ।
साध्यसाधनयोरुक्तिरुक्तादन्यत्र नेष्यते ॥ ५६ ॥
मुखं पद्ममिवेत्यत्र किं साध्यं किञ्च साधनम् ॥
इति प्रयोगस्य यथा कलावपि भवानिह ।
श्रेयान् वृद्धानुशिष्टत्वात् पूर्वे कार्तयुगे यथा ॥५७॥
यत्र दृष्टान्तमात्रेण व्यज्येते साध्यसाधने ।
तमाहुः शुद्धदृष्टान्तं तन्मात्राविष्कृतेर्यथा ॥ ५८ ॥
भरतस्त्वं दिलीपस्त्वं त्वमेवैलः पुरूरवाः ।
त्वमेव वीर प्रद्युम्नस्त्वमेव नरवाहनः ॥ ५९ ॥
कथमेकपदेनैव व्यज्येरन्नस्य ते गुणाः ।
इति प्रयुञ्जते सन्तः केचिद्विस्तरभीरवः ॥ ६० ॥
पदमेकं परं साधु नार्वाचीनं निबन्धनम् ।
वैपरीत्याद्विपर्यासं कीर्तेरपि करोति तत् ॥ ६१ ॥
अहृद्यमसुभि(नि?)र्भेदं रसवत्त्वेऽप्यपेशलम् ।

---

१ सौहृदात्-क । २ दृष्टानां-घ ।

काव्यं कपित्थमाम्रं वत(मंच?) केषाञ्चित्सदृशं यथा॥६२॥

प्रजाजनश्रेष्ठवरिष्ठभूभृ-
च्छिरोचिताङ्घ्रेः पृथुकीर्तिधिष्ण्यं[1] ।
अंहिघ्नपद्मस्य[2] जलारिधाम्न-
स्तवैव नान्यस्य सुतस्य वृत्तम् ॥ ६३ ॥

अंशुमद्भिश्च मणिभिः फलनिम्नैश्च शाखिभिः ।
फुल्लैश्च कुसुमैरन्यैर्वाचोऽलङ्कुरुते यथा ॥ ६४ ॥

शुभमरकतपद्मरागचित्रे
सफलसपल्लवभूरिचारुवृत्ते ।
बहुकुसमाविभूषिते स तस्थौ
सुरमुनिसिद्धयुते सुमेरुपृष्ठे ॥ ६५ ॥

तदेभिरङ्गैर्भूष्यन्ते भूषणोपवनस्रजः ।
वाचां वक्रार्थशब्दोक्तिरलङ्काराय कल्पते ॥ ६६ ॥

विरूढपदमस्वर्थं बहुपूरणमाकुलम् ।
कुर्वन्ति काव्यमपरे व्यायताभीप्सया यथा ॥ ६७ ॥

एलातक्कोलनागस्फुटबकुललताचन्दनस्यन्दनाढ्य-
स्वक्काकर्पूरचक्रागुरुमनःशिलाद्यामकाव्यासतीरः ।
शङ्खव्राताकुलान्तस्तिमिमकरकुलाकीर्णवीचीप्रतानो
दध्रे यस्याऽम्बुराशिः शशिकुमदसुधाक्षीरशुद्धां सुकीर्तिम्॥६८॥

---

१ धिष्ण्यः-घ । २ य०-घ ।

इति निगदितास्तास्ता वाचामलङ्कृतयो मया
बहुविधकृतीर्दृष्ट्वाऽन्येषां स्वयं परितर्क्य च ।
प्रथितवचसः सन्तोऽभिज्ञाः प्रमाणमिहापरे
गुरुतरधियामस्त्वाराधं मनोऽकृतबुद्धिभिः ॥ ६१ ॥

इति श्रीभामहालङ्कारे पञ्चमः परिच्छेदः ।

अथ षष्ठः परिच्छेदः ।

सूत्राम्भसं पदावर्त्तं पारायणरसातलम् ।
धातूणादिगणग्राहं ध्यानग्रहबृहत्प्लवम् ॥ १ ॥
धीरैरालोकितप्रान्तममेधोभिरसूयितम् ।
सदोपभुक्तं सर्वाभिरन्यविद्याकरेणुभिः ॥ २ ॥
नापारयित्वा दुर्गाधममुं व्याकरणार्णवम् ।
शब्दरत्नं स्वयङ्गम(म्य?) मलङ्कर्तुमयं जनः ॥ ३ ॥
तस्य चाऽधिगमे यत्नः कार्यः काव्यं विधित्सता ।
परप्रत्ययतो यत्तु क्रियते तेन का रतिः ॥ ४ ॥
नाऽन्यप्रत्ययशब्दा वाग— — —मुदे सताम् ।
परेण धृतमुक्तेव सरसा कुसुमावली ॥ ५ ॥
मुख्यस्तावदयं न्यायो यत स्वशक्त्या प्रवर्तते ।
अन्ये सारस्वता नाम सन्त्यन्योक्तानुवादिनः ॥ ६ ॥
प्रतीतिरर्थेषु यैतस्तं शब्दं ब्रुवतेऽपरे ।
धूमभासोरपि प्राप्ता शब्दताऽन्यानुमां प्रति ॥ ७ ॥
नन्वकारादिवर्णानां समुदायोऽभिधेयवान् ।
अर्थप्रतीतये गीतः शब्द इत्यभिधीयते ॥ ८ ॥

---

१ अन्व–ग० । २ व यस्त–घ ।

प्रत्येकमसमर्थानां समुदायोऽर्थवान् कथम् ।
वर्णानां क्रमवृत्तित्वान् न्याय्या नापि च संहतिः ॥९॥

न चापि समुदायिभ्यः समुदायोऽतिरिच्यते ।
दारुभित्तिभुवोऽतीत्य किमन्यत् सद्म कल्प्यते[1] ॥१०॥

तस्मात् कूटस्थ इत्येषा शाब्दी वः कल्पना वृथा ।
प्रत्यक्षमनुमानं वा यत्र तत्परमार्थतः ॥ ११ ॥

शपथैरपि चादेयं वचो न स्फोटवादिनाम् ।
नभःकुसुममस्तीति श्रद्दध्यात् कः सचेतनः ॥ १२ ॥

इयन्त ईदृशा वर्णा ईदृगर्थाभिधायिनः ।
व्यवहाराय लोकस्य प्रागित्थं समयः कृतः ॥ १३ ॥

स कूटस्थोऽनपायी च नादादन्यश्च कथ्यते ।
मन्दाः साङ्केतिकानर्थान् मन्यन्ते पारमार्थिकान् ॥१४॥

विनश्वरोऽस्तु नित्यो वा सम्बन्धोऽर्थेन वा सता ।
नमोऽस्तु तेभ्यो विद्वद्भ्यः प्रमाणं येऽस्य निश्चितौ ॥१५॥

अन्यापोहेन[2] शब्दोऽर्थमाहेत्यन्ये प्रचक्षते ।
[3]अन्यापोहश्च नामाऽन्यपदार्थोऽपाकृतिः किल ॥१६॥

यदि गौरित्ययं शब्दः कृतार्थोऽन्यनिराकृतौ ।
जनको गवि गोबुद्धेर्मृग्यतामपरो ध्वनिः ॥ १७ ॥

---

१ किमन्यं सत्यकल्प्यते-घ । अन्यायोहे तु-क ।

३ अन्यापोहश्च नामान्य वा (प?) दार्थो वा (पा?) कृतिः किल-ग ।

अर्थज्ञानफलाः शब्दा न चैकस्य फलद्वयम् ।
अपवादविधिज्ञाने फले चैकस्य वः कथम् ॥ १८ ॥
पुरा गौरिति विज्ञानं गोशब्दश्रवणाद् भवेत् ।
येनाऽगोप्रतिषेधाय प्रवृत्तो गौरिति ध्वनिः ॥ १९ ॥
वर्णभेदादिदं भिन्नं वर्णाः स्वांशविकल्पतः ।
के शब्दाः किञ्च तद्वाच्यमित्यहो वर्त्म दुस्तरम् ॥ २० ॥
द्रव्यक्रियाजातिगुणभेदात् ते च चतुर्विधाः ।
यदृच्छाशब्दमप्यन्ये डित्थादि प्रतिजानते ॥ २१ ॥
नानाभाषाविषयिणामपर्यन्तार्थवर्त्तिनाम् ।
इयत्ता केन वाऽमीषां विशेषादवधार्यते ॥ २२ ॥
वक्रवाचां कवीनां ये प्रयोगं प्रति साधवः ।
प्रयोक्तुं ये न युक्ताश्च तद्विवेकोऽयमुच्यते ॥ २३ ॥
नाऽप्रयुक्तं प्रयुञ्जीत चेतःसंमोहकारिणम् ।
तुल्यार्थत्वेऽपि हि ब्रूयात् को हन्तिं गतिवाचिनम् ॥ २४ ॥
श्रोत्रादि न तु दुर्बोधं न दुष्टादिमपेशलम् ।
ग्राम्यं न पिण्डीशूरादि न डित्थादिमपार्थकम् ॥ २५ ॥
नाऽप्रतीतान्यथार्थत्वं धात्वनेकार्थतावशात् ।
न लेशज्ञापकाकृष्टसंहृति ध्याति वा यथा ॥ २६ ॥
न शिष्टैरुक्तमित्येव न तन्त्रान्तरसाधितम् ।
छन्दोवदिति चोत्सर्गान्न चापि च्छान्दसं वदेत् ॥ २७ ॥

क्रमागतं श्रुतिसुखं शब्दमर्थ्यमुदीरयेत् ।
अतिशेते ह्यलङ्कारमन्यं व्यञ्जनचारुता ॥ २८ ॥

सिद्धो यश्चोपसंख्यानादिष्ट्या यश्चोपपादितः ।
तमाद्रियेत प्रायेण न तु योगविभागजम् ॥ २९ ॥

इयं चन्द्रमुखी कन्या प्रकृत्यैव मनोहरा ।
अस्यां सुवर्णालङ्कारः पुष्णाति नितरां श्रियम् ॥३०॥

वृद्धिपक्षं प्रयुञ्जीत सङ्क्रमेऽपि मृजेर्यथा ।
मार्जन्त्यधररागं ते पतन्तो बाष्पबिन्दवः ॥ ३१ ॥

सरूपशेषं तु पुमान् स्त्रिया यत्र च शिष्यते ।
यथाह वरुणाविन्द्रौ भवौ शर्वौ मृडाविति ॥ ३२ ॥

यथा पटयतीत्यादि णिच् प्रातिपदिकात्ततः ।
णाविष्ठवदितीष्ट्या च तथा क्रशयतीत्यपि ॥ ३३ ॥

प्रयुञ्जीताऽव्ययीभावमदन्तं नाप्यपञ्चमि ।
तृतीयासप्तमीपक्षे नालुग्विषयमानयेत् ॥ ३४ ॥

तिष्ठद्गुप्रभृतौ वाच्यौ नक्तंदिवसगोचरौ ।
यथा विद्वानधीतेऽसौ तिष्ठद्गु च वहद्गु च ॥३५॥

शिष्टप्रयोगमात्रेण न्यासकारमतेन वा ।
तृचा समस्तषष्ठीकं न कथञ्चिदुदाहरेत् ॥ ३६ ॥

सूत्रज्ञापकमात्रेण वृत्रहन्ता यथोदितः ।
अकेन च न कुर्वीत वृत्तिं तद्गमको यथा ॥३७॥
पञ्चराजीति च यथा प्रयुञ्जीत द्विगुः स्त्रियाम् ।
नपुंसकं तत्पुरुषं पुरुहूतसभं यथा ॥ ३८ ॥
सर्वेभ्यश्च भृशादिभ्यो वदेल्लुप्तहलं यथा ।
प्रियोन्मनायते सा ते किं शठाऽभिमनायसे ॥३९॥
तृतीयैकवचैः षष्ठ्यामामन्तं च वदेत् क्विपि ।[1]
यथोदितं बलभिदा सुरुचां विद्युतामिव ॥ ४० ॥
असन्तमपि यद्वाक्यं तत्तथैव प्रयोजयेत् ।
यथोच्यतेऽम्भसां भासा यशसामम्भसामिति ॥ ४१ ॥
पुंसि स्त्रियां च[2] क्वस्वन्तमिच्छन्त्यच्छान्दसं किल ।
उपेयुषामपि दिवं यथा न व्येति चारुता ॥ ४२ ॥
इभकुम्भनिभौ[3] बाला दधुषी कन्तुके[4] स्तनौ ।
रतिखेदपरिश्रान्ता जहार हृदयं नृणाम् ॥ ४३ ॥
शबलादिभ्यो नितरां भाति णिज् विहितो यथा ।
बलाकाः पश्य सुश्रोणि घनाञ्छबलयन्त्यमूः ॥४४॥
शिशिरासारकणिकां सदृशस्ते तु कङ्कवत् ।
संवीजयति सुश्रोणि रतिखेदालसेक्षणाम् ॥ ४५ ॥

---

१ तृतीयेव चतुः षष्ठ्या—क । २ पुंस्त्रियां च—ग ।
३ इभकुम्भनिभे—ग । ४ कन्तुकौ—घ ।

एवं णिचः प्रयोगस्तु सर्वत्राऽलङ्कृतिः परा ।
लिङ्गत्रयोपपन्नं च ताच्छील्यविषयं णिनिम् ॥ ४६ ॥
तस्या हारी स्तनाभोगो वदनं हारि सुन्दरम् ।
हारिणी तनुरत्यन्तं कियन्न हरते मनः ॥ ४७ ॥
ताच्छील्यादिषु चेष्यन्ते सर्व एव तृनादयः[1] ।
विशेषणैर्वं[2] तत्रेष्टा युत्कुरज्वरजिष्णुचः ॥ ४८ ॥
क्तिन्नन्तं च प्रयुञ्जीत सङ्गतिः संहतिर्यथा ।
शकारौ जागुरिष्टौ च जागर्या जागरा यथा ॥ ४९ ॥
उपासनेति च युचं नित्यमासेः प्रयोजयेत् ।
ल्युट च कर्तृविषयं देवनो रमणो यथा ॥ ५० ॥
अण्णान्तादपि ङीबिष्टो लक्ष्मीः पौरन्दरी यथा ।
अण् महारजनाल्लाक्षारोचनाभ्यां तथा च ठक् ॥५१॥
ड्मतुबिष्टं च कुमुदाद्यर्थेयं भूः कुमुद्वती ।
ठक् चापि तेन जयतीत्याक्षिकः शास्त्रिको यथा ॥५२॥
हितप्रकरणे णं च सर्वशब्दात् प्रयुञ्जते ।
ततश्छमिष्ट्यौ[3] च यथा सार्वः सर्वीय इत्यपि ॥ ५३ ॥
वदेदिमनिजन्तं च पाटिमा लघिमा यथा ।
विशेषणेयसुन्निष्टो ज्यायानाप कनीयसीम् ॥ ५४ ॥

---

१ सर्व एवाऽत्र नादयः—ग । २ विशेषेण च—ग ।
३ ततश्चमिष्टया—क ।

इयसज्दघ्नचाविष्टौ प्रमाणविषयौ यथा ।
जानुदघ्नी सारिन् नारीनितम्बद्वयसं सरः ॥ ५५ ॥
मतुप्प्रकरणो ज्योत्स्नातमिस्राशृङ्गिणादयः ।
इनच फलबर्हाभ्यां फलिनो बर्हिणो यथा ॥ ५६ ॥
इनिः प्रयुक्तःप्रायेण तथा ठंश्च मनीषिभिः ।
तत्रापि मेखलामालामायानां सुतरां मता ॥ ५७ ॥
अभ्यस्ताज्झेरदादेशे दधतीत्यादयोऽपि च ।
रोदितिस्वपितीत्यादि सहेटा सार्वधातुकम् ॥ ५८ ॥
अभ्यस्तेषु प्रयोक्तव्यमदन्तं च विदेः शतुः ।
असौ दधदलङ्कारं स्रजं बिभ्रच्च शोभते ॥ ५९ ॥
..........................रं योगिनं वदेत् ।
यथैतच्छ्यामम‍ाभाति वनं वनजलोचने ॥ ६० ॥
नैकत्रौकारभूयस्त्वं गतो घातो हतो यथा ।
सावर्ण्यत्वसयोर्भस्य ब्रूयान्नान्यत्र पद्धतेः ॥ ६१ ॥

सालातुरीयमतमेतदनुक्रमेण
को वक्ष्यतीति विरतोऽहमतो विचारात् ।
शब्दार्णवस्य यदि कश्चिदुपैति पारं
भीमाम्भसश्च जलधेरिति विस्मयोऽसौ ॥ ६२ ॥

१ भूयाभ्या०—क ।

विद्यानां सततमपाश्रयोऽपरासां
तासूक्तान्नं च विरुणद्धि कांश्चिदर्थान् ।
श्रद्धेयं जगति मतं हि पाणिनीयं
माध्यस्थ्याद् भवति न कस्यचित्प्रमाणम् ॥ ६३॥

अवलोक्य मतानि सत्कवीना-
मवगम्य स्वधिया च काव्यलक्ष्म ।
सुजनावगमाय भामहेन
ग्रथितं रक्रिलगोमिसूनुनेदम् ॥ ६४ ॥

इति श्रीभामहालङ्कारे षष्ठः परिच्छेदः ।

षष्ठ्या शरीरं निर्णीतं शतषष्ठ्या त्वलङ्कृतिः ।
पञ्चाशता दोषदृष्टिः सप्तत्या न्यायनिर्णयः ॥
षष्ठ्या शब्दस्य शुद्धिः स्यादित्येवं वस्तुपञ्चकम् ।
उक्तं षड्भिः परिच्छेदैर्भामहेन क्रमेण वः ॥

इति ।

---

१ तासूक्तां न—ग । २ वकिल—क, रक्रिल—घ ।
३ स्यादित्येव—ग ।